# आकाशवाणी

**दिनाङ्क : 29/12/2024** **सायम् - 06:20**

**मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् भारतीयं संविधानम् अस्मभ्यं मार्गदर्शकं विद्यते।
- मन की बात कार्यक्रमे श्रीमोदिना आग्रिमे मासे महाकुम्भे भागं स्वीकृत्य ऐक्यस्य सङ्कल्पं दृढीकर्तुं जना: अध्यर्थिता:।
- प्रधानमंत्री संतोषं प्रकटयत् विश्व-स्वास्थ्य-सङ्घटनस्य प्रतिवेदनानुसारं पञ्चदशोत्तर-द्विसहस्रवर्षात: त्रयोविंशत्युत्तर-द्विसहस्रवर्षं यावत् भारते मलेरिया इति रोगेण मृतकानां संख्या प्रतिशतम् अशीति: मिता न्यूना अभवत्।
- दक्षिण कोरिया-देशे विमान-दुर्घटनायां सप्त-सप्त्युत्तरैक-शतं जनाः मृत्युमुपगताः। तत्र साहाय्योद्धार-कार्यं सजवं विधीयते।
- चतुरङ्गक्रीडायां भारतस्य कोनेरू हम्पी द्वितीय-वारं विश्व-रैपिड-ब्लिट्ज-चैंपियनशिप इति स्पर्धां विजितवती। प्रधानमन्त्रिणा नरेन्द्र मोदिना च कोनेरू हम्पी वर्धापिता।

**मन की बात**

प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् संविधानम् अस्मभ्यं मार्गदर्शकं विद्यते। गौरव-विषयः अयम् यत् अग्रिमे वर्षे जनवरी मासस्य षड्विंशे दिने भारतीय-संविधानस्य पञ्चसप्ततिः वर्षाणि पूर्णाः भविष्यन्ति। आकाशवाण्याः मन की बात कार्यक्रमे राष्ट्रं समबोधयन् श्री-मोदी अवदत् यत् संविधानं समयस्य प्रत्येकं समाह्वानं समाधातुं समर्थम् अस्ति। तेनोदीरितं यत् अस्मिन् वर्षे संविधान-दिवसस्य अवसरे भूरि-गतिविधयः आरब्धाः याः आवर्षं प्रवर्तयिष्यन्ते ।

श्री मोदिना उक्तं यत् संविधानस्य रिक्थेन सह नागरिकान् संयोजयितुम् **www.constitution75.com** इत्याख्यं विशेषं वेब-फलकं निर्मितमस्ति। तेन मन की बात इति कार्यक्रमस्य श्रोतारः बालाः यूनः च एतत् वेब-फलकं द्रष्टुम् अध्यर्थिता:।

श्रीमोदिना उक्तं यत् अग्रिमे वर्षे जनवरी मासस्य त्रयोदश दिनात् प्रयागराजे महाकुम्भ: आरप्स्यते। एतदर्थं सङ्गमतटे सन्नद्धता जवेन विधीयते। प्रधानमत्रिणा गौरवं प्रकटितं यत् कुम्भस्य **विशेषता केवलं तस्य विशालता** नास्ति अपितु अस्य विविधतायाम् अपि वर्तते। तेनोक्तं यत् कुम्भ: ऐक्यस्य महाकुम्भ: अपि विद्यते। श्रीमोदिना महाकुम्भे भागं स्वीकृत्य ऐक्यस्य सङ्कल्पं दृढीकर्तुं जना: अध्यर्थिता:।

सममेव प्रधानमन्त्रिणा गङ्गाया: प्रवाहमेव अविभाजित समाजस्य अपि आशा प्रकटिता। प्रधानमन्त्रिणा उक्तं यत् कुम्भ मेलापकस्य पूर्णं क्षेत्रम् ए०आई० संचालितै: चित्रग्राहक-यन्त्रै: संवलितं क्रियते।

श्रद्धालव: डिजिटल इति अङ्कीय माध्यमेन प्राप्तं विलुप्तं चेति केन्द्रस्य सा ौविध्यमपि प्राप्स्यन्ति। एनीमेशन इत्येनम् आलक्ष्य श्रीमोदी प्रसन्नतया अवोचत् यत् कृष, तृष, बाल्टीबॉय के.टी.बी. चेति बालेभ्य: आनन्दप्रदा चलचि ित्र-शृङ्खला विद्यते। यस्या: द्वितीयं संस्करणं विशेषतया गोवायाम् आयोजिते भारतीयान्ताराष्ट्रिय चलचित्रमहोत्सवे आरब्धम्, एषा दूरदर्शनेन समम् अन्यासु अपि ओ.टी.टी. प्रसारण वाहिकासु द्रष्टुं शक्यते। आकाशवाणीत: अपि अस्या: प्रसारणं प्रत्येकं रविवासरे प्रात: सार्धदशवादने विधीयते। एनिमेशन इत्याधारितानां चलचित्राणां सामान्यचलचित्राणां धारिवाहिकानां च लोक-प्रियतया सिध्यते यत् भारतस्य चलचित्रोद्योगे कियत् सामर्थ्यं वर्तते। श्रीमोदिना चलचित्र-मनोरञ्जन-जगत: जना: वर्धपिता: यतोहि तै: एकं भारतं श्रेष्ठं भारतं चेति भावना सुदृढा कृता।

प्रधानमंत्री नरेन्द्रमोदी संतोषं प्रकटयत् विश्व-स्वास्थ्य- सङ्घटनस्य प्रतिवेदनानुसारं पञ्चदशोत्तर-द्विसहस्रवर्षात् त्रयोविंशत्युत्तर-द्विसहस्रवर्षं यावत् भारते मलेरिया इति रोगेण मृतकानां संख्यां प्रतिशतम् अशीति: मिता न्यूना अभवत्।

**योगी महाकुम्भ:**

उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः अद्य राष्ट्रपतिना द्रौपदी मुर्मुः वर्यया सह राष्ट्रपति-भवने अमिलत्। तेन राष्ट्रपतिः द्रौपदी मुर्मुः आगामि-मासे आरप्स्यमाणे महाकुम्भ-पर्वणि उपस्थातुम् निमन्त्रिता। अवधेयं यत् महाकुम्भः जनवरी त्रयोदश-दिनात् फरवरी षड्विंश-दिनं यावत् भविष्यति।

**ऋतु-सञ्चेतना**

ऋतुविज्ञानविभागेन अद्यारभ्य उत्तर भारते शीतलहयो: संचेतनां प्रकापितम अनेनविभागेन प्रोक्तं यत् पश्चवर्ती विक्षोभकारणत् आगामि दिवसद्वये उत्तर-पश्चिम भारते तापमान पञ्च डिग्री सेल्सियसपरिमितं न्यूनतां प्राप्स्यति इति सम्भाव्यते।

**दक्षिणकोरिया-विमान-दुर्घटना**

दक्षिण कोरिया-देशे विमान-दुर्घटनायां सप्त-सप्त्युत्तरैक-शतं जनाः मृत्युमुपगताः। अस्मिन् विमाने एकाशीतिः उत्तरैक-शतं यात्रिणः आरूढाः आसन्। एतत् विमानं बैंकॉक-नगरात् दक्षिण कोरियायाः सिओल क्षेत्रतः द्विशत-ककीलोमीटर-दूरस्थं मुआन-नगरं प्रति गच्छति स्म। तत्र साहाय्योद्धार-कार्यं प्रवर्तते। तत्रत्येन प्रशासनेन अधिकारिभ्यः सर्व-सम्भव-साहाय्य-कार्याय निर्दिष्टाः।

**प्रधानमन्त्री-कोनेरू हम्पी**

प्रधानमन्त्री नरेन्द्र मोदी अद्य कोनेरू हम्पी इत्येनां चतुरङ्गक्रीडायां विश्व-रैपिड-ब्लिट्ज-चैंपियनशिप इति स्पर्धां विजेतुं वर्धापितवान्। एकस्मिन् सामाजिक-संचारपटले श्रीमोदी तस्या: द्वितीय-विजयाय प्रशंसितवान्। अवधेयं यत् कोनेरू हम्पी चीनस्य जू वेनजुन इत्यास्याः अनन्तरं द्वितीया क्रीडिका संवृत्ता यया एकाधिकवारम् एषा स्पर्धा विजिता। श्रीमोदी अवोचत् यत् कोनेरू हम्पी अन्येभ्य: प्रेरणा-स्रोतरूपा वर्तते।

**जम्मू राजमार्ग:**

जम्मू कश्मीरस्य श्रीनगर-जम्मू राष्ट्रीय-राजमार्ग: अद्य वाहनानाम् गमनागमनाय पुन: उद्घाटित:। अयं राजमार्ग: काश्मीर क्षेत्रे प्रतिकूल ऋतु प्रभावेन अथ च प्रचण्ड हिमपातकारणेन शुक्रवासरात् दिनद्वयं यावत् पिहित:। यातायात अधिकारिणा प्रोक्तं यत् यात्रिभ्य: वाहनेभ्य: च उभाभ्याम् दिशाभ्याम् राजमार्गे गमनागमनस्य अनुमति: प्रदत्तास्ति। तेन प्रोक्तं यत् यात्रिण: राजमार्गे अनुशासनस्य पालनं कुर्यु:। सममेव एतदपि प्रोक्तं यत् मुगलमार्ग:, सोनमर्ग कारगिल मार्ग:, भद्रवाह-चंबा चेत्यादि मार्गा: हिमपात-कारणेन इदानीमपि पिहिता: सन्ति।

**क्रिकेट्**

मेलबर्न नगरे ऑस्ट्रेलिया-देशेन साकं "बॉर्डर-गावस्कर-ट्रॉफी" इत्यस्य चतुर्थ-क्रिकेट-निकष-स्पर्धाया: चतुर्थे दिने क्रीडावसानं यावत् ऑस्ट्रेलिया-दलेन द्वितीय-पाल्यां नवक्रीडकाणां हानौ अष्ट-विंशत्युत्तर-द्विशतं धावनाङ्काः समर्जिताः। प्रथम-पाल्यां समेत्य ऑस्ट्रेलिया-दलं त्रयस्त्रिंशदुत्तर-त्रिशतं धावनाङ्कैः अग्रे वर्तते । पञ्च-स्पर्धात्मिकायाम् अस्यां शृङ्खलायाम् उभे दले समान-अङ्के वर्तेते ।

**इति वार्ता।**